# Mantrapushpanjali मंत्रपुष्पांजलि

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् |

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः || 1 ||

ॐ राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे |

स मे कामान्कामकामाय मह्यम् कामेश्वरो वैश्रवणो ददातु |

कुबेराय वैश्रवणाय महाराजाय नमः || 2 ||

ॐ स्वस्ति| साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं

समंतपर्यायी स्यात्सार्वभौमः सार्वायुष आंतादापरार्धात्पृथिव्यै समुद्रपर्यंताया एकराळिति || 3 ||

तदप्येषः श्लोको ऽभिगीतो |

मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे |

आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति || 4 ||